# तृतीयप्रकरणम्
# कर्मकाण्डस्य महत्त्वम्

1. वैदिकसाहित्ये कर्मकाण्डस्य महत्त्वम् ।

2. दार्शनिकदृष्ट्या महत्त्वम् ।

3. धार्मिकदृष्ट्या महत्त्वम् ।

4. आध्यात्मिकदृष्ट्या महत्त्वम् ।

5. लौकिकदृष्ट्या महत्त्वम् ।

# 1. वैदिकसाहित्ये कर्मकाण्डस्य महत्त्वम्

वेदेषु एकलक्षमन्त्राः स्वीकुर्वन्ति। तत्र कर्मकाण्डविषयकः अशीतिसहस्र मन्त्राः सन्ति। यतोहि जन्मतः मृत्युपर्यन्तं यानि–यानि कार्याणि भवन्ति तत्र सर्वे कर्मकाण्डस्य विषयाः स्वीकुर्वन्ति। एतद्रिक्तं यजनयाजनयोः पूजानादिकं सर्वेषां देवाना ंपूजने–अर्चने च कर्मकाण्डस्यैव कार्यं भवति। अपि च मनुष्यस्य जीवनसम्बन्धिकार्येषु यथा वास्तुपूजनं षोडशसंस्कारः इत्यादिषु कार्येषु कर्मकाण्डस्यैव पद्धतिः भवति। अनेन कारणेन कर्मकाण्डस्य अनेके विषयाः सन्ति।

**<u>कर्मकाण्डशब्दस्यार्थः –</u>**

'कनी दीप्तौ धातो कमुकान्तौ धतौः' अमन्ताऽऽ'' क्वादिभ्यः[1]

अनुनासिक्य दीर्घकाण्डशब्दस्य निष्पत्तिः।
काण्डं चावसरे वाणे नाले स्कन्धे च शाखिनाम्।
स्तम्बे रहसि वर्गे च इति धरणिः।।

काण्डे स्तम्बे तरुस्कन्धे बाणे वसनीरयोः।
कुत्सिते वृक्षाभिन्नाड़ी रहसिवृन्दे नास्त्रियाम्।।[2]

काण्डः काण्डम् – कण+ऽ दीर्घः। इयमपि निष्पत्ति स्वीक्रियते। अस्य शब्दस्य अनेके अर्थाः सन्ति। यथा (ग्रन्थस्य भागः, समूहः, अंशः, दण्डम्, जलम्, अवसरः, इत्यादयः।)

**<u>कर्मकाण्डस्य पर्यायाः –</u>**

कर्मकाण्डस्य अनेकेपर्यायशब्दाः सन्ति। पौरोहित्य, देवार्चनं, याजनं, याज्ञयागादिकमित। चतुर्वेदेषु लक्षपरिमिताः मन्त्राः सन्ति। तत्र 80000 मन्त्राः कर्मकाण्डस्य, षोडशसहस्रात्मकाः मन्त्राः उपासनाकाण्डस्य, चतुः सहस्रात्मकाः मन्त्राः ज्ञानकाण्डस्य सन्ति। अनेन ज्ञायते मनुष्यस्य जीवने कर्मकाण्डस्य अतीव महत्वम् वर्तते। यथा मीमांसासूत्रे कथितमस्ति – ''आम्नायस्य क्रियार्थत्वात्''[3]

तदेवं तादृशविधिवचनानुष्ठानेनैव जनः निःश्रेयसः लभते। स्वर्गकामो यजत् इत्यत्र यजेदित्यादिविधौ यत् तादृशकर्मानुष्ठानम् प्रति या प्रेरणा उत्पद्यते तदेव कर्मरूपेण व्यपिदृश्यते।

वैदिकविध्यानुसारेण देवपूजानादिकं तदेवं कर्मकाण्डकर्म इति कथ्यते। वेदविहितकर्मानुष्ठानेन लोके कर्मफलप्राप्तिः भवति। अतएव कर्मकाण्डस्य पौरोहित्यस्य वा अद्यापि अत्यन्तं महत्वं दृश्यते।

अस्मिन् देशे पौरोहित्यकर्म वैदिककालतः प्रचलति। जन्मतः मृत्युपर्यन्तम् कर्मकाण्डस्य पौरोहित्यस्य वा संगतिः संगच्छति। भारतदेशे मनुष्यस्य प्रतिकर्म अस्यैव आधारः स्वीक्रियते। ज्योतिषशास्त्रस्य यद्निष्ठम् दृश्यते तस्य शमनोपायः कर्मकाण्डद्वारा एव स्वीक्रियन्ते यथा ग्रहशान्तिः जन्मविषयकम् यद्यपि दुष्कृतम् तदपि कर्मकाण्डद्वारैव शाम्यति। स्मृतिग्रन्थानाम् निर्देशानुसारेण षोडशसंस्काराणां विधिः क्रियते। अनेन स्पष्टीभवति यत् कर्मकाण्डस्य का उपयोगिता अस्य उपयोगित्वम् सिद्धयति। मानवानां चतुर्विध पुरुषार्थ प्राप्त्यर्थम् प्रथमेहि धर्मः वर्तते। धर्मस्य कोऽपि विधिः यदा स्वीक्रियते तदा श्रौतग्रन्थस्य द्वारा, पौराणिकग्रन्थद्वारा च विधीयते। एतदेव अस्य कर्मणः महतवम्। अत्र कर्मकाण्डस्य उपयोगिता विषये प्रस्तूयते –––

1. षोडशसंस्काराः।
2. दोषपरिहाराय।
3. ग्रहदोषनिवारणम्।
4. रोगनिवृत्यर्थम्।
5. कर्मकाण्डस्य महत्त्वम्।

**षोडशसंस्काराः ––**

गर्भाधानसंस्कारादारभ्य अन्त्येष्टि पर्यन्तम् या विधिः उपयुज्यते सोविधिः वैदिकरीत्या संस्क्रीयते। अत्र कर्मकाण्डस्य उपयोगिता सिद्धयति।तद्यथा ––

1. गर्भाधानसंस्कारः।
2. पुंसवनसंस्कारः।

3. सीमन्तोन्नयनसंस्कारः।
4. जातकर्मसंस्कारः।
5. नामकरणसंस्कारः।
6. निष्क्रमणसंस्कारः।
7. अन्नप्राशनसंस्कारः।
8. चूड़ाकरणसंस्कारः।
9. उपनयनसंस्कारः।
10. चत्वारिवेदव्रत ऋग्वेदः।
11. यजुर्वेदः।
12. सामवेदः।
13. अर्थर्ववेदः।
14. समावतर्नसंस्कारः।
15. केशान्तसंस्कारः।
16. विवाहसंस्कारः।

**दोषपरिहाराय :———**

मानवजीवने यानि विविधानि दूषणानि च आगचछन्ति तद्दोषाणां निवृत्यर्थम् विविधाः सपर्याः क्रीयन्ते तदपि कर्मकाण्डस्यैव आधारेणैव विधीयते।

**ग्रहदोषनिवारणम् :———**

ज्योतिषशास्त्रस्याधारेण प्रतिमनुष्यस्य जीवने नवग्रहाणाम् प्रभावः भवति यदा ग्रहाणां शुभदृष्टिः भवति तदा किमपि नैव क्रियते जनैः किन्तु यदा ग्रहाणां अशुभफलं भवति तदा अस्योपयोगिता दृश्यते। कर्मकाण्डग्रन्थेषु ग्रहशान्तिः विविधरूपेण क्रियते।

**रोगनिवृत्यर्थम्ः——**

‘शरीरंव्याधिमन्त्रम्’ इतिरीत्या सर्वेषाम् जनानां विविधारोगाः जायन्ते। तद्रोगाणां निवारणाय कर्मकाण्डद्वारा विधिः क्रियते अत्रैव अस्योपयोगिता सिद्धयति।

**कर्मकाण्डस्य महत्त्वम् :——**

कर्मकाण्डस्य महत्त्वम् पूर्वकालतः एव अस्ति अस्य प्रयोगः पर्यावरण सन्दर्भेऽपि उपयुज्यते। यथा—विविधयज्ञादिनाम् आयोजनम् प्राचीनकालतः क्रियते यदा पर्जन्यादिज्ञानम् प्रकोपः अजायत् तत्शान्त्यर्थम् अपि विविध यज्ञादीनाम् समायोजनम् अभूत। तथैव यदा वर्षाकालेऽपि वर्षा न जायते तदाऽपि पर्जन्य यज्ञः समायोज्यते। तेन कारणेन पर्यावरणस्य सम्यक् रक्षणाय अपि यज्ञम् क्रियते स्म्। तदवदेव अन्येषाम् यज्ञानां विधिः सम्पन्नः क्रियते स्म। कर्मकाण्डस्य विविधेषु क्षेत्रेषु उपयोगिता प्राक्कालतः अद्यावधिः स्वीक्रियते।

**कर्मकाण्डविषयः ——**

मानवसमाजे अनेके विषयाः तत् उन्नयाय समीक्षिता यथा ——

1.वर्णाश्रमव्यवस्था।

2.विविधाःसंस्काराः।

3.गार्हस्थजीवने नित्यनैमित्तकानि प्रर्याश्चित्तानि कर्माणि यानि सन्ति तेषां शास्त्रोचितविधिद्वारा प्रपूरणाय या क्रिया स्वीक्रियते सैव कर्मकाण्डविधिः कथ्यते। तत्रापि अनेकविधयः यज्ञाः तत्र भवन्ति। कर्मकाण्डानुरोधेन ———

1.दशपूर्णमासः

2.पितृयज्ञः

3.चातुर्मासेयष्टिः

4.राजसूयः

5.सोमयागः

6.वाजपेयः

7.अग्निपयनं

8.शतरुद्रियम्

9.वसोधारा इत्यादयाः विषयाः कर्मकाण्डस्य।

शक्तिशाली पुरुषः प्रेयः, श्रेयश्चसाधयतिुं कर्मकाण्डद्वारा कार्यम् करोति। येषां विषयाणां कदा कथम् सम्पन्नः कुर्यात् अस्य समाधानं ज्योतिषे वर्तते। किन्तु एतदपूर्वम् ज्योतिषशास्त्रस्य ये प्रधान विषयाः संति तेषां अपि ज्ञानं अपेक्षते।

# सन्दर्भ–सूची


1. अमर.–3 / 112
2. मेदिनी–40 / 203
3. मीमांसा–1 / 2 / 1

## 2. दार्शनिकदृष्ट्या महत्त्वम्

भारतीयदर्शने जनानां अभ्युदयाय निश्रेयससिद्धये च विचारः भवति। दर्शनशब्दस्य अर्थः – दृश्यते अनेन इति दर्शनम्।

**दर्शनशब्दस्य अर्थः परिभाषा च :–**

(दृश्यते·नेनेति। दृश्+करणे ल्युट्।) नयनम्। स्वप्नः । बुद्धिः। धर्म्मः। उपलब्धिः। दपर्णः। (दृश्यते यथार्थतत्वमनेनेति।) शास्त्रम्।

शास्त्रन्तु षडविधम्। वैशेषिकन्यायमीमांसासांख्यपातज्जलवेदान् तरूपम्। एतानि तत्वज्ञानार्थं वेदान् विचार्य कणादगौतमजैमिनिपतज्जलि–व्यासाख्यैर्मुनिषटकैः कतृानि। । इज्या। इत्यज्यः।। वर्णः। दति त्रिकाण्डशेषः।। चाक्षुषज्ञानम्। देखा इति भाषा। तात्पर्य्यायः। निर्व्वर्णनम्, निध्यानम्, आलाकनम्, ईक्षणम् ।निभालनम्। इति जटाधरः।

यथा भागवते [1] आहूत इव मे शीघ्रं दर्शनं याति चेतसि। पुण्यदर्शनानि यथा–

**नन्द उवाच–**

येषाञ्च दर्शने पुण्यं पापञ्च यस्य दर्शने।
तत सर्व्वं वद सर्व्वेश! श्रोतुं कौतूहलं हि मे।।

**श्रीभगवान उवाच –**

सुब्राह्मणानां तीर्थानां वैष्णवाञ्च दर्शने।
देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः।।

सूर्यस्य दर्शने भक्त्या सतीनां दर्शने तथा।
सन्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम्।।

भक्त्या गवाञ्च वन्हीनां गुरुणाञ्च विशेषतः।।
गजेन्द्रणाञ्च सिहानां श्वेताश्वानन्तथैव च।

पतिपुत्त्रवतीनाञ्च नराणां तीर्थयिनाम्।।
प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः।

मुक्तानां हीरकाणाञ्च माणिक्यानां महाशयः।।
तुलसीशुक्लपुष्पाणां दर्शनं पापनाशनम्।

फलानि शुक्लधन्यानि घृतं दधि मधूनि च।।
पूर्णकुम्भश्च लाजाञ्च राजेन्द्र दर्पणं जलम्।

मालाञ्च शुक्लपुष्पाणां दृष्टवा पुण्यं लभेन्नरः।।
गोरोचनाञ्च कर्पूरं दुन्द्वभिः दृष्टवा सद्यः पुण्यं लभेन्नरः।

शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा।
कस्तूरीं कुङ्कुमं दृष्टवा नन्द ! पुण्यं लभेन्नरः।।

पताकामक्षयवटं तरुं देवोत्थितं शुभम्।
देवालयं देवख्यातं दृष्टवा पुण्यं लभेन्नरः।।

शुक्तिं प्रवालं रजतं स्फटिकं कुशुमूलकम्।
गङ्गमृदं कुशं ताम्रं दृष्टवा पुण्यं लभेन्नरः।।

पुराणपुस्तकं शुद्धं सबीजं विष्णुयन्त्रकम्।
स्निग्धदूर्व्वाक्षतं रत्नं दृष्टवा पुण्यं लभेन्नरः।।

तपस्विनं सिद्धमन्त्रं समुद्रं कृष्णसारकम्।
यज्ञमहोत्सवं दृष्टवा सुपुण्यं लभते नरः।।

गोमूत्रं गोमयं दुग्धं गोधूलिं गोष्ठगोस्पदम्।
पक्वशस्यान्वितं क्षेत्रं दृष्टवा पुण्यं लभेन्नरः।।

रुचिरां पद्मिनीं श्यामां न्यगोधपरिमण्डलम्।
सुवेशकां सुवसनां दिव्यभूषिताम्।।

वेश्यां क्षेमङ्करी गन्धं सदूर्व्वाक्षततण्डुलम्।
सिद्धान्नं परमान्नञ्च दृष्टवा पुण्यं लभेदध्रुवम्।।

कार्तिकीपूर्णिमायाञ्च राधिकाप्रतिमां शुभम्।
संपूज्य दृष्टवा नत्वा च कराति जन्मखण्डनम्।।

हिङ्गुलायां तथाष्टम्यामिषे मासि सति सिते शुभे।
श्रीदुर्गा पतिमां दृष्टवा करोति जन्मखण्डनम्।।
शिवरात्रौ च काश्यञ्च विश्वनाथस्य दर्शनम्।
कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम्।

जन्माष्टमीदिने भक्तो दृष्टवा मां बिल्वमाधवम्।।
प्रणम्य पूजां कृत्वा करोति जन्मखण्डनम्।

उपोष्व ब्रजभूमौ च भाण्डीरे मालतीवने।
संपूज्य राधां माञ्चैव करोति जन्मखण्डनम्।।

पौषे मसि शुक्लरात्रौ यत्र तत्र स्थले नरः।
पद्मायाः प्रतिमायां दृष्टवा करोति जन्मखण्डनम्।।

सप्तजन्म भेवत्तस्य पुत्रः पौत्रो धनेश्वरः।
उपोष्यैकादशीं स्नात्वा प्रीाते द्वादशीदिने।।

दृष्टवा काश्यामन्नपूर्णां करोति जन्मखण्डनम्।
प्रयागे मुण्डनम् कृत्वा यश्च पितृन् प्रतर्पयेत्।।

उपोष्य नैमिषारण्ये करोति जन्मखण्डनम्।
उपोष्य पुष्करे स्नात्वा किंवा वदरिकाश्रमे।

दृष्टवा प्रतिमां नन्द! क्रोति जन्मखण्डनम्।।
दोलायमानं गोविन्दं दृष्टवा वृन्दावने च माम्।

दृष्टवा संपूज्य मामेव करोति जन्मखण्डनम्।
भाद्रे दृष्टवा च मञ्चस्थ मामेवं मधुसूदनम्।।

रथस्थञ्च जगन्नाथं या द्रक्ष्यति कलौ नरः।
संपूज्य भक्त्वा नत्वा च करोति जन्मखण्डनम्।।

उत्तरायणसंक्रान्त्यां प्रयागे स्नानाचरेत।
संपूज्य नक्त्वा मामेव करोति जन्मखण्डनम्।।

चन्द्रभागासमीपे च माधायाञ्च मां नयेत् शनैः।
राधया सह मां दृष्टवा करोति जन्मनः क्षयम्।।

रामेश्वरं सेतुबन्धे आषाढ़ीपूर्णिमादिने।
उपोष्य दृष्टवा संपूज्य करोति जन्मनः क्षयम्।

कृषिकोष्ठे सुवसने कलविड्.के सुगहवरे।
विस्यन्दके राजकोष्ठके नन्दके पुष्पभद्रके।।

पार्व्वतीप्रतिमां दृष्टवा कार्तिकेयं गणेश्वरम्।
नन्दिनं शंकरं दृष्टवा करोति जन्मनः क्षयम्।।

त्रिकूटे मणिभद्रे च पश्चिमोदधिसन्निधौ।
समुपोष्य दधि प्राश्य मां दृष्टवा मुक्तिमाप्नुयात्।। [2]

आत्यन्तिक दुःखनिवृत्तये दर्शनानाम् उद्भवो जातः। आस्तिक दर्शनानां संख्या षडेव वर्तन्ते। तद्यथा –

1. योगदर्शनम्।
2. सांख्यदर्शनम्।
3. न्यायदर्शनम्
4. वैशेषिकदर्शनम्
5. मीमांसादर्शन्म्।
6. वेदान्तदर्शनम्।

एतेषु दर्शनेषु विविधाः विषयाः समाहिताः सन्ति। तत्र ईश्वरविचारः, जीवविचारः, संसारसृष्टिः, तत्वविचारः, मोक्षविचाराश्च अत्र सर्वेषु दर्शनेषु ईश्वरविषयिकी चर्चा विद्यते। कः नाम ईश्वरः ? तत्र योगदर्शने सांख्यदर्शने च विचारः भवति एव। योगानुसारेण ईश्वरः जीवभिन्नः वर्तते। संसारस्य निमित्तकारणम! उपादानकारणं च ईश्वरः नास्ति। सः निर्लेपः, निगुणश्च वर्तते। वेदान्ताधारेण शांकरमते·पि ईश्वरः तदवेदव किन्तु पारमार्थिकः वर्तते। कार्यकारणभाव सम्बन्धः असम्भवः वर्तते।

श्रौतदर्शने ईश्वरः श्रुतिसिद्धः वर्तते। नैयायिकानुसारेण ईश्वरस्य सिद्धिः अनुमानेन भवन्ति। मीमांसकायाः पौरुषेयः अपौरुषेयः इति विचारः भवति। श्रौतदर्शने दार्शनिकैः ईश्वरसिद्धिः कर्मणा क्रियते। प्रमाणैः च ईश्वरसिद्धि भवन्ति।

**जीवविचारः :–**

जीवविषये दार्शनिकानां मध्ये मतैक्यं नास्ति। आस्तिकदर्शनेषु वैशेषिकानां मतमस्ति। यत् जीवात्मा विकारी अस्ति। जीवात्मा कूटस्थः नास्ति, नित्यः नास्ति। तत्र मीमांसकानां मते प्रभाकरमते च आत्मा अंशभेदेन ज्ञानरूपेण, जड़रूपेण च अस्ति।[3]

**वल्लभमते आत्मस्वरूपम् :–**

समस्तशास्त्रपारावारपारीणानां विश्वचिन्ताविमुक्तचित्तभावानां करतलामलकवत् सकलपदार्थजातं प्रत्यक्षीकुर्वाणानां दिव्येन चक्षुषा च बाह्यामाभ्यान्तरञ्च जगदालाकयतां आचार्यप्रवरणानां शान्तचेतसा आत्ममननपरिणितिभूतैवियं दर्शनशास्त्रप्रवृत्तिः। भगवान् वेदोऽपि आत्मा वा अरे द्रष्टव्यः श्रोतव्योनिदिध्यासितव्यश्चेति। [4] समुपदिशति। वस्तुतः आत्मसाक्षात्करणमेव मानवजन्मनः साफल्यम्। तदात्मप्रपञ्चस्य दिक्दर्शकशास्त्रमिदं दर्शनमिति व्यपदिश्यते। तानीमानि दर्शनानि षड् जेगीयन्ते। यथा – न्याय–वैशेषिक–सांख्य–योग–मीमांसा–

वेदान्तसंज्ञकानि। वेदशास्त्रानुगतानि दर्शनानि षडिति पुरातनी रूढ़िः। एतेषु दर्शनेषु मुख्यतः आत्मनः परमात्मनो वा निरूपणं जातं जगतो मूलतत्वञ्च निरूपणमस्ति।

विभिन्न आचार्याणां मते आत्मब्रह्मचिन्तने काऽवधारणा समेषां सम्प्रदायाचार्याणां शब्दतोऽर्थतो वा दृश्यमानेऽपि विसंवादे ब्रह्मात्मतात्पर्य वियीभूतेऽर्थे समानाकारत्वम् एवाचार्याणां पर्यवसानम्।

करौतवचनेषु –आत्मावाऽरे दृष्टव्यः श्रोतव्यो निदिध्यासितव्यः।

आत्मैवेदं सर्वम्, तदुह वा द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यश्च आत्मवेदं सर्वम् सच्चिदानन्दरूपमिदं सर्वम् (नृ.ता.3/7) अहमेव जगत्सर्वम् (तेजोवि. 6/43) आतमनि ब्रह्म (शां. 11/1) आत्मनो वाऽरे। (शा.ब्रा. –14/5/84/5) इत्यादीनि विविधवचनानि प्राप्यन्ते। एतेषु वचनेषु विश्वसन्तः सन्तः आत्मचिन्तनविषयेऽवश्यं प्रयतरेन्। सर्वेषु दर्शनेषु आचार्यमतेषु च आचार्याणामात्मब्रह्मचिन्तनविषयकः मौलिकः सिद्धान्तः लिख्यते।

जीवोऽयं विना परमात्मनोऽनुकम्पां किमपि कर्तु न प्रभवति। अनुकम्पमेव मुक्तिं लभते। तदनुकम्पा च भक्तिसाध्या, परमा भक्तिश्च ज्ञानोदयो देवादिति। ब्रह्मणः जीवस्यैक्यमभिमतम्, परं तदैक्यं न वास्तवम्।

जीवस्य तादृशत्वं च चित्वमात्रं न चापरम्।
तावन्मात्रेण चाभाष्ये रूपमेषां चिदात्मनाम्।। [5]

पुष्टिमार्गप्रवर्तकः शुद्धाद्वैतवादप्रतिपादकः वल्लभाचार्यः दार्शनि–कोऽपि विशेषः उल्लेखनीयः। वल्लभानां ब्रह्म मायया अलिप्तं नितान्तशुद्ध श्च मायासम्बन्धरादित्येन अद्वैतमृ। पुष्टिमार्गेऽस्मिन् सिद्धान्ते ब्रह्मणः सर्वधर्मविशिष्टत्वमत एव च विरुद्ध धर्माश्रयत्वं स्वीक्रियते।[6]

उभयव्यपदेशात् त्वहिकुण्डलवत् – इति ब्रह्मसूत्रोपसीपयन्तश्चेमे ब्रह्मणि अहिकुण्डलवदुभयरूपत्वं श्रुतिसिद्धां साधयन्ति। जीवविषये स्वीकृतः

यत् अयं जीवस्तिरोहितानन्दादिगुणः स्वयमीश्वरो ब्रह्मैव। लीलाकैवल्यादेव स ईश्वरो जीवत्वं प्रतिपद्यते न पुनर्मायोद्वेलितः। वल्लभाः निर्गुणं ब्रह्मैव जगद्रूपेण परिणतं मन्यन्ते। यथा केयूरकटकादिषु ब्रह्म न किञ्चिदपि परिणतिमेतीत्येषां सिद्धान्तः।

एवमात्मब्रह्मचिन्तने विभिन्नवादाः विविधप्रस्थाना अपि मे दार्शनिकाः विरुद्धविचारान् स्थापयन्तोऽपि न मिथो विरुद्धाः कथयितुं शक्यन्ते। यतः समेषामेषामेषा चिन्तनसरणिमोक्षप्रसादमाप्तुं सोपानभूता। सर्वेषां अद्वैतादिवादिनां सम्प्रदायाचार्यसिद्धान्तनाञ्च दृश्यमानेऽपि विसंवादे तत्तात्पर्यविषयीभूतेऽर्थे समानाकारत्वमेव समेषांमेषां पर्यवसानमिति। भवतुनाम ब्रह्मस्वरूपमाभिलक्ष्य दार्शनिकानां शाब्दिको मतभेदः किन्तु ब्रह्मज्ञानपुरः सरं मोक्षपथपदर्शन्मेव सर्वेषां चरमुद्देश्यमिति संशीति शून्यं वचः।

**संसारविचारः –**

संसरति इति संसारः। पृथ्वी, जल, अग्नि, वायुः इत्यादीनां परमाणुः एव संसारस्य निर्माणं करोति। न्यायवैशेषिकयोः सूर्यस्य मरीचिसु रजकणानां अवयवाः एव परमाणुः भवति। मीमांसकमते शब्दनित्यता एव स्वीक्रियते। परमाणद्वये संयोगेन सृष्टिः भवति। मीमांसकमते शब्दनित्यता एव स्वीक्रियते। शब्दाः एव कार्यमस्ति। सांख्यमते शब्दः एव कार्यमस्ति। अहंकारस्य कारणं महत् अस्ति। महत् तत्वं प्रकृतिः त्रिगुणात्मिका वर्तते। सृष्टिविषयकविचारः शंकराचार्यमते विवर्तवादस्य दृष्टि–सृष्टिः वादः अस्ति। किन्तु वल्लभसम्प्रदाये संसारस्य चतुर्भेदः वर्तते इति।

**तत्त्वविचारः –**

सर्वैः दार्शनिकैः संसारस्य मलपदार्थानां विचारः कृतः। पदार्थस्य अपरनाम् तत्वं वर्तते। रामानुजसम्प्रदायानुसारेण अनेकानि तत्वानि निर्दिष्टानि। माध्वसम्प्रदायानुसारेण तत्वानां संख्या दश अस्ति।

न्यायवैशेषिकदर्शने अनेकानि तत्वानि अनेन कारणेन अस्य दर्शनस्य अपरनाम् तत्वविचारशास्त्रे अस्ति। संख्यदर्शने चत्वारि तत्वानि सन्ति। मूलतत्वज्ञानेन मोक्षप्रप्तिः भवति।

**मोक्षविचारः –**

मोक्षविषये दार्शनिकेषु मध्ये विवादः वर्तते। अत्र वेदान्त दृष्टया मोक्षविषयिकी चर्चा नोपेक्षते।

**दार्शनिकमहत्वम् :–**

वल्लभसम्प्रदाये प्रस्थानचतुष्टयस्य अतीव महत्वं वर्तते। यतोहि–

कर्मकाण्डद्वारा भगवदाधाराधनं क्रियते। वैदिकदृष्ट्या मोक्षप्राप्ति अर्थम् कर्मकाण्डस्य अतीव महत्वं वर्तते।

जैमिनी सूत्राधारेण–''अथातो धर्म जिज्ञासा'' सूत्रतः आरभ्य पूर्वकाण्डस्य प्रतिपादनं अनेकेषु स्थलेषु उल्लेखः कृतः। कर्मकाण्डविषये वल्लभाचार्येण अनेक स्थलेषु उल्लेखः कृतः। कर्मकाण्डविषये पुराणानां वाक्यानि अनेके स्थले उद्धृतानि। यथा – श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनम्। [7] भगवताधारेण वैदिककर्म– काण्डस्य अतीव महत्वं वर्तते।

# सन्दर्भ–सूची


1. श्रीमदभागवते–1 / 6 / 34
2. श्रीमदभागवत
3. प×चदशी –6 / 88
4. बृहदारण्यकोपनिषदि–2 / 4 / 57
5. भ.सि.सार–पृ.32
6. ब्र.स.–3 / 2 / 27
7. प्रस्थान चतुष्टय–पृ.–46, गो. चन्द्रगोपालजी महाराज

## 3.धार्मिकदृष्ट्या महत्त्वम्

पुरुषार्थ चतुष्टयं निगदितुं तत्र धर्मः अर्थः, कामः, मोक्षश्च। अत्र को नाम धर्मः ?

धनुः । यमः। सोमपः। **इति मेदिनी।** मे सत्सङ्गः। अर्हन्।[1]

देवताविशेषः। स ब्राह्मणो दक्षिणास्तनाज्जातः।

यथा मत्स्यपुराणे–

अंगुष्ठदक्षिणादक्षः प्रजापतिराजायत्।

धर्म्मस्तनान्तादभवत् हृदयात् कुसुमायुधः।।[2]

तस्य भार्य्या दक्षस्य त्रयोदशकन्याः।

तस्य चतुर्दशापत्यानि यथा–

1. पत्न्यां श्रद्धायां ऋतम्।
2. मैत्रयां प्रसादः।
3. दयायाम् अभयम्।
4. शान्त्यां सुखम्।
5. तुष्टयां मुत्।
6. पुष्टयां गर्व्वः।
7. क्रियायां योगः।
8. उन्नतौ दर्पः।
9. बुद्धयाम् अर्थः।
10. मेधायां स्मृतिः।
11. मूत्त्तार्यां नरनारायणौ।
13. तितिक्षायां क्षेमम्।
14. ह्रीसंज्ञायां प्रच्छयः।[3]

अपि च –

श्रद्धा लक्ष्मीधृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः।।

विष्णुमते सिद्धिस्थाने ऋद्धिरन्यात् तुल्यम्।
तासामपत्यानि यथा –
श्रद्धा कामञ्च श्रीर्दर्पं नियमं धृतिरात्मजम्।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरसूयत्।।

मेधां श्रुतं क्रियां दण्डं नयं विनयमेव च।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम्।।

व्यवसायं प्रजजे वै क्षेमं शान्तिरसूयत्।
सुखं सिर्द्धियशः कीर्तिरित्येते धर्म्मसूनवः।।
कामो नन्दी सुतं हर्षं धर्म्मपौत्त्रमसूयत्।।

अधर्मवंशो – यथा मार्कण्डेयपुराणे –

हिंसा भार्य्या त्वधर्म्मयस्य तस्यं जज्ञे तथानृतम्।
कन्या च निकृतिस्ताभ्यां सुतौ द्वौ नरकं भयम्।।

माया च वेदना चैव मिथुनं द्वयमेतयोः।
भयाज्जज्ञेऽथ वै जज्ञिरे।।

दुःखोत्तराः स्मृता होते सर्व्वे चाधर्म्मलक्षणाः।
नैषां भार्य्यास्ति पुत्त्रो वा सर्व्वे ते ह्यूर्दध्वतेरसः।।[4]

**धर्म्मोत्पत्तिर्यथा वराहपुराणे –**

अथोपत्तिं प्रवक्ष्यामि धर्म्मस्य महतो नृप।
माहात्मच्च तिथिच्चैव तन्निबोध नराधिपः।।

सर्व्वं ब्रह्माव्ययः शुद्धपरादपरसंज्ञितः।
सः सिसृक्षुः प्रजास्त्वादौ पालनाञ्च व्यचिन्तयत।।

तस्य चिन्तयतास्त्वा›दक्षिणाच्छवेतकुण्डलः।
प्रादुर्बभूव पुरुषः श्वेतामाल्यानुलेपनम्।।

तं दृष्टवोवाच भगवांश्चतुष्पात् स्यात् कृते युगे।
त्रेतायां त्रिपदश्वासौ द्विपदो द्वापरे·भवत।।

कलावेकेन पादेन प्रजाः पालयते प्रभुः।
षडेगेहो ब्राह्मणानां स त्रिधा क्षत्त्रे व्यवस्थितः।।

द्विधा विश्वेकधा शूद्रे स्थितः सर्व्वगतः प्रभुः।
गुणद्रव्यक्रियााजातिचतुष्पादः प्रकीर्तितः।।

त्रिशृ›ो·सौ स्मतो वेदे ससंहितापदक्रमः।
तथा आद्यन्त ओड़्कारद्विशिराः सप्तहस्तवान्
उदात्तादित्रिभिर्बद्ध एव धर्म्मो व्यवस्थितः।।

ब्रह्मोवाच – अद्याप्रभृतिभिः ते धर्म्म। तिथिरस्तु त्रयोदशी।।
यस्तामुपोष्य पुरुषो भवन्तं समुपाार्ज्जयेत।
कृत्वा पापसमाचारं तस्मान्मुच्चति मानवः।।[5]

**यथा वामनपुराणे –**

धर्म्मस्य भार्य्या हिसांख्या तस्यां पुत्त्रचतुष्टयम्।
सम्प्राप्तं मुनिशार्दूल! सांख्यवेत्तामपरं कपिलं वोढमासुरिम्।
दृष्टवा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्।। [6]

ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम्।। ( चतुर्दशद्वापरे वेदव्यासनादयमेव व्यास आसीत्।[7]

यथा देवीभागवते –

धर्म्मो नारायणो नाम व्यासस्तु भविता यदा।
तदाप्यहं भविष्यामि भविष्यामि महामुनिः।।

बलखिल्याश्रमे पुण्यापर्व्वते गन्धमादने।
तत्रापि मम ते पुत्त्रो भविष्यति तपोधनाः।।

सुधामा काव्यपश्चैव कनिष्ठा विरजास्तथा।
मम योगबलोपेता विमना ह्यूर्द्धतेरसः।।
प्राप्य माहेश्वरं तेजो रुद्रालोकाय संस्थिताः।।
क्वचित् युगस्य वैपरीत्यकथ्यनन्तु –
कल्पभेदादविरुद्धमित्यगन्तव्यम्।

धर्मलक्षणं यथा –

पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्।
श्रद्धा वलिर्गवां ग्रासः षडविधं धर्म्मलक्षणम्।। [8]

धर्म्मा›ानि यथा पाद्मभूमिखण्डे –

ब्राह्मचर्य्येण  सत्येन तपसा च पर्वतते।
दानेन नियमेनापि क्षमाशौचेन वल्लभ।।

अहिंसया सुशान्त्या च अस्तेयेनापि वर्त्तते।
एतैर्दशभिरं›ैस्तु धर्म्ममेव प्रसूचयेत्।।[१]

धर्म्ममूलं यथा मत्स्यपुराणे –

आद्राहश्चाप्यलोभश्च दमो भूतदयातपः।
ब्रह्मचर्य्यं ततः सत्यमनुक्रोशः क्षमा धृतिः।
सनातनस्य धर्म्मस्य मूलमेतदुरासदम्।।

कलेर्दशसहस्रवर्षान्ते धर्म्मादयो हरेः पदं गमिष्यन्ति।

यथा – शालग्रामो हरेर्मूर्तिजगन्नाथश्च भारतम्।
कलेदर्शसहस्रान्ते ययौ त्यक्त्राः हरेः पदम्।।

सत्वञ्च धर्म्मं सत्यञ्च वेदाश्च ग्रामदेवताः।
व्रतं स्थानं तवाधारो वदामि श्रूयतां विभो।
वैष्णवेषु सर्व्वेषु यतिषु ब्रह्मचारिषु।।

पतिव्रतासु प्राज्ञेषु वानप्रस्थेषु भिक्षुषु।
नृपेषु धर्म्मशीलेषु सत्सु सद्वैश्यजातिषु।।

द्विजसेविषु शूद्रेषु सत्संसर्गस्थितेषु च।

एषु त्वं सन्ततं पूर्णो धर्म्मराज विराजसे।।
युगे–युगे तवाधारा एते पुण्यतमा जनाः।।

अपि च –

अश्वत्थवटविल्वेषु तुलसीचन्दनेषु च।
देवार्हेषु च पुष्पेषु विद्यमानो·सि शाखिसु।।

देवालयेषु तीर्थेषु सतां शश्वद्गृहेषु च।
वेदवेदांगश्रवणजनेषु च सभासु च।।

श्रीकृष्णगुणनामोक्तश्रुतिगीतस्थलेषु च।
व्रतपूजातपोन्याययज्ञसाक्षिस्थलेषु च।।

दीक्षापरीक्षाशपथगोष्ठपदभूमिषु।
गवां गृहेषु गोष्ठेसु विद्यमानो हि पश्यसि।।
कृशता न भविता धर्म्मतेषु स्थलेषु च।

धर्म्मागम्यस्थानानि यथा –

एतदन्येषु कृशता यदगम्यञ्च तत् शुणु।
पुंश्चशील तद्गृहेषु गृहेषु नरघातिनाम्।।

नरघातिषु नीचेषु मूर्खेषु च खलेषु च।
देवतागुरुविप्रेषु पाल्यानां धनहारिषु।।
असन्नरेषु धूर्तेषु तालच्छायासु गर्व्विर्सु।।

असिजीविमसीजीविदेवलग्रामयाजिषु।
वृषवाहस्वर्णकारजीवहिंसोपजीविषु ।।

भर्तृनिन्दतनारीषु स्त्रीजितेषु च पुसुं च।
दीक्षासन्धिविष्णुभक्तिविहीनेषु द्विजेषु च ।।

स्वा›कन्याविक्रीयिषु स्वयोषिद्विक्रयिष्वथ।
शालाग्रामसुरग्रन्थभूमिविक्रयिषु प्रभो।।

मित्रद्रोहिकृतघ्नेषु सत्यविश्वासघातिषु।
शरणागतहीनेषु आतिघ्नेषु तेषु च।।

शश्वन्मिथ्योक्तिशीलेषु तथा सीमापहारिषु।
कामात्क्रोधात्तथा लोभान्मिथ्यासाक्षिप्रवादिषु।।

पुण्यकर्म्मविहीनेषु पुण्यकर्म्मविरोधिषु।
स्थातुमेतेषु निन्द्येषु नाधिकारस्त प्रभो।।[10]

देवादीनां धर्म्मो यथा –

सुकेशिरुवाच–

किंलक्षणो भवेद्धर्म्मः किमाचरणसत्क्रियः।
यमाश्रित्यः न सीदन्ति देवाद्यास्तु तदुच्यताम्।।

ऋषयः उवाच –

देवानां परमो धर्म्मः सदा यज्ञादिकाः क्रियाः।
स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृतिः।।

दैत्यानां बाहुशालित्वं मात्सर्य्य युद्धसत्क्रिया।
विन्दनं नीतिशास्त्राणां हरशक्तिरुदाहृता।।

सिद्धानासुदितो धर्म्मो योगयुक्तिरनुत्तमा।
स्वाध्यायं ब्रह्मविज्ञान भक्तिर्द्वाभ्यामपि सिथरा।।

उत्कृष्टोपासनं ज्ञेयं नृत्यवाद्येषु वादिता।
सरस्वत्यां स्थिरा भक्तिगन्धर्व्वो धर्म्म उच्यते।।

विद्याधरत्वमतुलं विज्ञानं पौरुषे मतिः।
विद्याधराणां धर्म्मोऽथ भवान्यां भक्तिरेव च।।

गान्धर्व्वविद्यावेदित्वं भक्तिः स्थाणौ तथा स्थिरा।
कौशल्यं सर्व्वशिल्पेषु धर्म्मः कैम्पुरुषः स्मृतः।।

ब्रह्मचर्य्य यताशित्वं जप्यज्ञानञ्च राक्षस।
नियमा धर्म्मवेदित्वमार्षं धर्म्मं प्रचक्षते।।
स्वाध्यायं ब्रह्मचर्य्यञ्च दानं यजनमेव च।
अकार्पण्यमनायासं दयाहिंसाक्षमादयः।।

जितेन्द्रियत्वं शौचञ्च माङ्गल्यं भक्तिरुच्यते।
शंकरे भास्करे देव्यां धर्म्मोऽयं मानवःस्मृतः।।
धनाधिपत्यं भोगानि स्वाध्यायं शंकरार्च्चनम्।
अहङ्कारमशौचञ्च धर्म्मोऽयं गुह्यकेष्विति।।

परदाराभिमर्षित्वं परार्थे·पि च लोलुपा।
स्वाध्यायस्त्रयम्बके भक्तिर्धम्मो·यं राक्षसः स्मृतः।।
अविवेकताथाज्ञानं शौचहानिरसत्यता।
पिशाचाानामयं धर्म्मः सदा चामिषगृध्नुता।।

योनयस्तु द्वादशैताः सह धर्म्माश्च राक्षस।
ब्रह्मणा कथिताः पुण्या द्वादशैव गतिप्रदाः।।[11]

अहिंसालक्षणो धर्म्मो हिंसा चााधर्म्मलक्षणा।[12]

वेदप्रणिहितो धर्म्मो ह्यधर्म्मस्तद्विर्य्ययः।[13]

विहितक्रियया साध्यो धर्म्मः पुंसां गुणो मतः।
प्रतिषिद्धक्रियासाध्यः स गुणो·धर्म्मो उच्यते।। [14]

दुह्यवंशीयनृपविशेषः। यथा भागवते ––
द्रुह्योस्तु तनयो वभ्रुः सेतुस्तस्यात्मजस्ततः।।
आरब्दस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृतः।।[15]

कर्मकाण्डस्य महत्वं वैदिकसाहित्यतः आरभ्य प्रायेण सर्वेषु सम्प्रदायेषु प्राप्यते। यतोहि वेदानां मन्त्रसंख्या लक्ष परिमिताः (1लाख) सन्ति। तस्य विभाजनं एतादृशः अस्ति। यथा –

1. कर्मकाण्डस्य मन्त्राः 80,000
2. उपासना काण्डस्य मन्त्राः 16000
3. ज्ञानकाण्डस्य मन्त्राः 4000

अनेन ज्ञायते यत् कर्मकाण्डस्य महत्वं धर्मदृष्टया अत्यन्तं वर्तते। धर्मक्रिया द्वारा पुरुषार्थ चतुष्टयस्य सिद्धिः भवति। धर्मस्य अनेके भेदाः सन्ति। वैदिकरीत्या धर्मक्रियायाः कः विधिः विषयेऽस्मिन् अनेके ग्रन्थाः निर्मिताः महर्षिभिः यथा – विविधाः यज्ञादीनां स्वरूपं विविच्यते।

**यज्ञशब्दस्य अर्थः :–**

यज्[16] शब्दः यज् धातोः यज् –याच–यत.(पाणिनि –3/3/90) इति सूत्रेण यजः शब्दः निष्पद्यते। तत्र देवपूजा, संगतिकरणम्, दान इत्यादि अथेषु यज्ञशब्दः स्वीक्रियते।

यज्ञः कस्मात् ? प्रख्यातं यजति कर्मेति नैरुक्ताः। याचञ्यो भवतीति वा यजुर्भिरून्नो भवतीति वा, बहुकृष्णाजिन इत्यौपमन्यवः यज्ध्येनं नयन्तीति वा।

दैवतं प्रति स्व–द्रव्यस्योत्सर्जनं यज्ञः।

**यज्ञस्य लक्षणम् :–**

देवानां द्रव्यहविषां ऋक्सामयजुषां तथा।
ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते।।[17]

**यज्ञशब्दस्य व्युत्पत्तिजन्य अर्थः :–**

1. **येन सदनु**ष्ठानेन इन्द्रप्रभृतयोः देवाः सुप्रसन्नाः सुवृष्टिः कुर्युस्तद् यज्ञपदाभिधेयम्।
2. **येन सदनु**ष्ठान स्वर्गादिप्राप्तिः सुलभा स्यात् तद् यज्ञपदाभिधेयम्।
3. **येन् सदनु**ष्ठानं समपूर्णं विश्वं कल्याणं भजेत् तद् यज्ञपदाभिधेयम्।
4. **येन सदनु**ष्ठानेन आध्यात्मिक–आधिदैविक– आधिभौतिकपत्र–योन्मूलनं सुकरं स्यात् यज्ञपदाभिधेयम्।

5. यागा›समूहस्य एकफलसाधनाय अपूर्ववान् कर्मविशेषो यागः।

6. मन्त्रैर्देवतामुद्दिश्य द्रव्यस्य दानं यागः।

**गौतमसूत्रे यथा –**

'औपासनहोमः, वैश्वदेवम्, पार्वणन्, अष्टका, मासिकाश्राद्धम्, श्रवणा, शलगव इति सप्त पाकयज्ञसंस्थाः। अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढ़पशुबन्धः, सौत्रमणी, पिण्डपितृयज्ञादया हर्विहोमा इति सप्त हविर्यज्ञसंस्था। अग्निष्टहोमः, अत्यग्निष्टहोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्त सोमसंस्थाः। [18]

श्रीमद्भागवते सात्विक, राजसिक एवं तामसिक यज्ञस्य चर्चा ईदृशी वर्तते। तद्यथा –

**सात्विक–यज्ञ :** अफलाकांक्षिभिर्यशो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्विकः।।[19]

**राजसिक–यज्ञ :** अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।।[20]

**तामसिक–यज्ञ :** विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।। [21]

**पञ्चमहायज्ञाः –**

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु बाह्यन्।
तासां क्रमेण सर्वासां नित्यकृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्।।
होमो दैवो बलिर्भूतं नृयज्ञोऽतिथिपूजनम्।[22]

पञ्चमहायज्ञस्च चर्चा विविधेषु ग्रन्थेषु ईदृशी प्राप्यते। यथा –

**तैत्तिरीय आरण्यक :**

'पञ्च वा एते महायज्ञाः सतति प्रतायन्ते सतति सन्तिष्ठान्ते ––– पितृयज्ञो मनुष्ययज्ञो भूतयज्ञो ब्रह्मयज्ञ इति।[23]

**शतपथ ब्राह्मण :**

भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति।[24]

**छान्दोग्यपरिशिष्ट :**

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात्।
महासत्राणि जानीयात्त एव हि महामखाः।। [25]

**आश्वालयनगृह्यसूत्र** :

अथातः पञ्चमहायज्ञा देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्य यज्ञ इति।[26]

**मनुस्मृति :**

अध्यापनं ब्रह्मयज्ञ, पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ।।[27]

**याज्ञवल्क्यस्मृति :**

बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः।
भूतपितृपरब्रह्म मनुष्याणां महामखाः।।[28]

**देवपूजा –**

1. यजनं इन्द्रदादि–देवानां पूजनं सत्कारभावनं यज्ञः।
2. इज्यन्ते (पूज्यन्ते) देवाः अनेनति यज्ञः।
3. इज्यन्ते देवा अस्मिन्निति यज्ञः।
4. इज्यते देवेभ्यः अस्मिन्निति यज्ञः।
5. इज्यते असौ इति यज्ञः। (विष्णुः)
6. इज्यन्ते सम्पूजिताः तृप्तिमासाद्यन्ते देवा अत्रेति यज्ञः।

**संगतिकरणम् :–**

1. यजनं धर्म–देश–जाति–मर्यादारक्षायै महापुरुषाणामेकौकरणं यज्ञः।
2. इज्यन्ते स›तीक्रियन्ते विश्वकल्याणाय परिभ्रमणं कृत्वा महान्तो विद्वासः वैदिकशिरोमणयः व्याख्यानरत्नाकराः निमन्त्रयते अस्मिन्निति यज्ञः।

**दान :–**

1. यजनं यथाशक्ति देशकाल–पात्रादिविचारपुरस्सरद्रव्यादित्यागः।
2. इज्यते देवताद्देशेन श्रद्धापुरस्स्रं त्यज्यते अस्मिन्निति यज्ञः।
3. इज्यन्ते सन्तोष्यन्ते याचका येन कर्मणा स यज्ञः।
4. इज्यन्ते भगवति सर्वस्वं निधाप्यते येन वा स यज्ञः।
5. इज्यन्ते चत्वारो वेदाः सा›ाः सरहस्याः सच्छिष्येभ्यः सम्प्रदीयन्ते सदाचार्य्यैयेन वा स यज्ञः।

# सन्दर्भ–सूची

---


1. हेमचन्द्रः 6 / 15
2. मत्स्यपुराणम्–3 / 10
3. श्रीमद् भागवतम्
4. मार्कण्डेयपुराणम्
5. वाराहपुराणम्
6. वामनपुराणम्
7. ब्रह्माण्डे – देवीभागवते – 1 / 3 / 29
8. इति पाद्मोत्तरखण्डे –देवीपुराणे
9. पाद्मभूमिखण्डे –देवीपुराणे
10. इति ब्रह्मवैवर्तपुराण–श्रीकृष्णजन्मखण्डे– 42 अध्यायः
11. इति वामनपुराणे 11 अध्यायः
12. महाभारतम्
13. श्रीभागवतम्
14. धर्मदीपिका
15. भागवते –9 / 23 / 14
16. पाणिनि –3 / 3 / 90
17. मत्स्यपुराण–144 / 44

18. (गौतमधर्म सूत्र– 8/18)

19. (गीता.17/11)

20. (गीता.17/12)

21. (गीता.17/13)

22. (मनु. 3/18/69)

23. आरण्यक – (2/10)

24. शतपथ ब्रा. – 11/5/5/1

25. छान्दोग्य

26. आश्वालयनगृह्यसूत्र – 3/1/1

27. (मनु.–3/72)

28. (याज्ञ. आचाराध्याय–102)

## 4.आध्यात्मिकदृष्ट्या महत्त्वम्

आत्मनमधिकृत्य भवं अधि + आत्मन ्+ ठ´्। दुःखविशेषः। यथा – दुःखानां त्रयं दुःखत्रयं तत् खल्वाध्यात्मिकं चााधिभौतिकं चाधिदैविकञ्च। तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां निमित्तं। मानसं कामक्रोधलाभमोहेर्षविषादविशषादर्शननिबन्धनम्। सर्व्वं चैतदान्तरोपाय –साध्यत्वात् आध्यात्मिकं दुःखं। [1]

आत्मतत्त्वविषयकं। [2] यथा लौकिकं वैदिकं वापि तथाध्यात्मिकमव च। आददीत यतो ज्ञानं तं पूर्ब्बमभिवादयेत।।

जनानां दुःखत्रयाणां निवारणाय वैदिकदृष्ट्या च कर्मकाण्डस्य आयोजनं क्रियते। यथा – आधिभौतिक दुःखनिवारणाय वैदिकमन्त्राणां प्रयोगः विविधरूपेण भवति।

आधिदैविक दुःखानां निवारणाय ग्रहाणां अनुष्ठानं क्रियते। यथा – ग्रहशान्तिः।

**नवग्रहादिस्थापनपूजन प्रयोगविधिः –**

**1.सूर्यपूजनविधिः –**

ऊँ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्येन सविता रथेना देवो याति भुवनानि पश्श्यन्।।
जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।
तमोऽरिं सर्वपाप्घ्नं प्रणतोस्मि दिवाकरम्।।

ऊँ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपगोत्रोत्पन्नः रक्तवर्णः भो सूर्यः। इहागच्छ, इह तिष्ठ, ऊँ सूर्यमावाहयामि, स्थापयामि।

**2.चन्द्रपूजनविधिः –**

ऊँ इमं देवा असपत्नसुवध्वं महते क्षत्राय।
महते ज्यैष्ठाय महते जानराज्यायेन्द्रस्येन्द्रियाय।।

इममभुष्य पुत्रमस्यै विशऽएष वोऽमी।

राजा सोमोंऽस्माकं ब्राह्मणाना राजा।।

दधिशंख तुषाराभं क्षीरोदार्णवसम्भवम्।

नमामि शशिनं सोमं शंभार्मुकुटभूषणम्।।

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्रोत्पन्न ॐ भूर्भुवः शुक्लवर्णं सोम्त्र! इहागच्छ, इह तिष्ठ ॐ सोमाय नमः, सोमायमावाहयामि, स्थापयामि।

**3.भौमपूजनविधिः –**

ॐ अग्निमुर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।

अपा रेता सि जिन्वति।।

धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्।

कुमारं शक्तिहंस्तं च मंगलं प्रणाम्यहम्।।

ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजगोत्रोपन्न रक्तवर्णं भो भौम!। इहागच्छ, इह तिष्ठ, ॐ भौममावहयामि, स्थापयामि।

**4.बुधपूजनविधिः –**

ॐ उद्बुध्यस्वागने प्रतिजागृहि त्वमिष्टापूर्ते स सृजेथामय×च।

अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत्।।

प्रियङ्गलष्कलिकाश्यामं रूपेणाप्रतिमं बुधम्।

सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्।।

ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयगोत्रोपन्न पीतवर्णं भो बुध!। इहागच्छ, इह तिष्ठ, ॐ बुधाय नमः, बुधायमावहयामि, स्थापयामि।

**5.बृहस्पतिपूजनविधिः –**

ॐ बृहस्पते अति यदर्योअर्हाद् द्युमद्विभाति क्रतुमज्जनेषु।

यद्दीदयच्छवसऽऋतप्रजात तदस्मासुद्रविण धेहि चित्रम्।।

देवानां च ऋषीणां च गुरुं काञ्चनसंनिभम्।

बुद्धि भुतं त्रिलोकेशं तन्नमामि बृहस्पतिम्।।

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव अंगिरागोत्रोपन्न पीतवर्ण भो गुरुो ! इहागच्छ, इह तिष्ठ, ॐ बुहस्पतये नमः, बृहस्पतिमावहयामि, स्थापयामि।

**6.शुक्रपूजनविधिः –**

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः।

ऋतेन सत्यमिन्द्रियं विपान शुक्रमन्धस ––

इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधुः।।

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्।

सर्वशास्त्रप्रवक्तारं भार्गवं प्रणाम्यहम्।।

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्रोपन्न शुक्लवर्ण भो बुध! इहागच्छ, इह तिष्ठ, ॐ शुक्राय नमः, शुक्रमावहयामि, स्थापयामि।

**7.शनिपूजनविधिः –**

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।

शष्योरभिस्रवन्तु नः।।

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम्।

छायामार्तण्डसम्भूतं तन्नमामि शनैश्चरम्।।

ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव भार्गवगोत्रोपन्न कृष्णवर्ण भो शनैश्चरा! इहागच्छ, इह तिष्ठ, ॐ शनौश्चराय नमः, शनैश्चरमावहयामि, स्थापयामि।

**8.राहुपूजनविधिः –**

ॐ कया नाश्चित्रऽआ भुवदूती सदावृक्षः सखा।

कया शचिष्ठया वृता।।

अर्धकायं महावीर्यं चन्द्रादित्य विमर्दनम्।

सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम्।।

ॐ भूर्भुवः स्वः राठिपुरोद्भव पैठीनागोत्रोपन्न कृष्णवर्ण भो राहु! इहागच्छ, इह तिष्ठ, ॐ राहवे नमः, राहुमावहयामि, स्थापयामि।

**9.केतुपूजनविधिः –**

ॐ केतुं कृण्वन्केतवे पेशो मर्या अपेशसे।

समुपद्भिरजायथाः।।

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्।

रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणामाम्यहम्।।

ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनीगोत्रोपन्न धूम्रवर्ण भो केतो! इहागच्छ, इह तिष्ठ, ॐ केतवे नमः, केतुमावहयामि, स्थापयामि। [3]

आधात्मिकमपि द्विविधं भवति। शारीरिक, मानसं च।

शारीरिकं कथं? वात–पित्त–श्मलेषं वा निमित्तम् शारीरिकं कथ्यते।

**मानसम्**–काम–क्रोध–लोभ–मोह–ईर्ष्या–विषाद–विशेष–दर्शन निबन्धनम् एतेषां दुःखानां निवारणाय मनुस्मृतौ –

लोके विदितः प्रसिद्धो हितो लोकं वेत्ति वा। लोक्+ठ्॑। लोकव्यवहारसिद्धः। यथा– वैदिका लौकिकज्ञैश्च ये यथोक्तास्तथै ते। निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसंग्रहः। इति कलापव्याकरणे सन्धिवृत्तौ प्रथमप्रकरणम्। लोकाय हित इत्यर्थे च ष्णिक् प्रत्ययनिष्पन्नः। [4]

## सन्दर्भ–सूची


1. इति सांख्यकौमुदी
2. मनुः 2/117
3. सुगमयागविधानम् – 60–62, डा. राजेन्द्र शुक्ल
4. मुग्धव्याकरणम्।

# 5. लौकिकदृष्ट्या महत्त्वम्

संसारस्य अपरनाम लोकः। लोकेषु यः व्यवहारे प्रसिद्धः भवति तदेव लौकिकः कथ्यते। अत्र लौकिकदृष्टया कर्मकाण्डस्य किं महत्वं इति उपस्थाप्यते।

लोके विदितः प्रसिद्धो हितो वेत्ति वा। लोक् + ठञ। लोकव्यवहारसिद्धः। यथा वैदिका लौकिकज्ञैश्च ते। निर्णीतार्थास्तु विज्ञेया लोकात्तेषांसंग्रहः। इति। कलाव्याकरण सन्धिवृत्तौ प्रथमप्रकरणम्। लोकाय हि इत्यर्थे च ष्णिकप्रत्ययनिष्प्रज्ञः इति ।[1]

वल्लभसम्प्रदाये प्रस्थानचतुष्टयस्य प्रसिद्धिः वर्तते। तर्हि लोके कृष्णवाक्यानि द्वितीयं प्रस्थानं स्वीक्रियते। अस्मिन् सम्प्रदाये कृष्णवाक्यैः किम् ?

तम् आत्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।[2]

ददामि बुद्धियोगं तं येनम ां उपयाान्ति ते।[3]

माहात्म्यज्ञानपूर्वस्तु सुदृढ़ः सर्वतो·धिकः।

स्नेहो भक्तिरीति प्रोक्तस्तया मुक्तिर्न चान्यथा।।[4]

द्वापरे युगे समनुप्राप्ते तत्रापि तृतीयेऽस्य युगस्य पर्याये·वसाने पराशरात्[5]

कृतय्रुापेक्षया तृतीये द्वापरे युगे युगपर्यवसाने समनुप्राते सति ———।[6]

युगस्य तस्य द्वापराख्यस्य तृतीये पर्यये युगत्रयमन्यदतिक्रम्य वैवस्वमन्वन्तरादितस्तृतीय आगमने सति।[7]

द्वापर इति युगानां सत्यादीनां बहूनां पर्ययोऽतिक्रमो यत्र तस्मिन् पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्यय इत्यमरः। बहुयुगादिक्रमे यद् द्वापरं तस्मिन्। तच्च कृष्णावतारसम्बन्ध्येव ज्ञेयम्। तदवतारश्च वैवस्तमन्वतरीयाष्टा –विंशतितमे संध्यांशरूपे।[8]

द्वापर इति । द्वापरे अष्टाविंशे भवित्री त्वं द्वापरे मत्स्योनिषु इति हरिवंशे सत्यवतीजन्मस्मरणात् तत्रैव अष्टावतारानुक्त्वा नवमोद्वापरे विष्णुरष्टाविंशे पुराभवात्। वेदव्याससस्तथा जज्ञे जातुकर्ण्य पुरस्कृत इति श्रीवेदव्यासजन्मस्मरणात् च समनुप्राप्ते सम्यगनुपश्चाद् गते सति तृतीये युगपर्यये। दिव्यसंवत्सरशतद्वयात्मकः चरमभागः तृतीयः सम्प्राप्ते। संध्यांशलक्षणः सन्निहितः कालस्तस्मिन् पुनस्तिष्ये च सम्प्राप्ते कुरवो नाम भारताः। भविष्यन्ति महात्मानो राजानः प्रथिता भुविः। तेषान्त्वतः प्रसूतानां कुलभेदो भविष्यति। परस्पर–विनाशार्थं त्वामृते द्विजसत्तमः। तत्राप्यनेकधा वेदान् भेत्स्यसे तपसान्तिवः। कृष्णु युगे च सम्प्राप्ते कृष्णवर्णो भविष्यसीति मोक्षवर्धकः। [9]

ब्रह्मकल्पस्य प्रथममन्वन्तरस्य तृतीयतुगपर्यायवृत्तौ व्यासस्य जन्म। प्रथमो युगपर्यायो ज्ञानस्य संसारधनस्य कालः। द्वितीय कर्मणः। तृतीयस्तु भुक्तेः। तथापि धर्माणां बाधकत्वात् कृते त्रेतायां च न जन्मः, किन्तु धर्मस्य द्विपरतायां सन्देहे सर्वेषामेव सन्देहः संशब्दार्थः। [10]

ब्रह्मकल्पस्येत्यादि। अत्रायमाशयः। मूले तृतीये युगपर्यय इति कथनादष्टाविंशतिपर्यायद्वापरस्य निवृत्तौ तत्रोन्नायाः एतमन्वन्त्रीयतृतीयपर्याय–द्वापरेऽभावात् तस्यापि निवृत्तौ तस्याः सोमवंशीयत्वेन तद्रहितमन्वन्तराणमपि निवृत्तावेतत्कल्पस्यैव निवृत्तेर्भूतस्य कल्पान्तरस्यावश्यं मृग्यत्वात् तस्मिन् विचार्यमाणे रजोगुणस्यैव प्रथमं क्षोभात् प्रथमः कल्पो राजस इति ब्रह्मकल्पस्य

राजसत्वे चाक्षुसो दधिसम्प्लव इत्यत्रोक्तन्यायेन तत्र एतस्मिन् यदभूत्ततो मार्तण्डः इति निरुक्तया जगतोऽग्नीषोमात्कत्वेन च सोमस्यापि तदा सत्वेन तद्वंशे जाते तृतीयेपर्यायद्वापर एव सत्यवत्या उत्पत्तौ वक्ष्यमाणायुकत्या पराशरस्यापि तदानीं सत्वात् ततीयपर्यायवृत्तौ व्यासजन्मेत्यर्थः। तृतीय इत्यादि कथनस्य प्रजोयनमाहुः प्रथममित्यादि। तथा च भक्तिप्रचारार्थत्वात –तृतीये पर्याये जन्मेति भावः। माध्वास्तु अधीतवान् द्वापरादा वित्यस्य व्याख्याने व्यासः षट्शतवर्षीयो धृतराष्टंमजीजन् दिति वाक्यादस्मिन् कल्पे व्यासजन्माहुः। द्वापरस्य तात्पर्यमाहुस्तथापीत्यादि।

धर्माणां बाधकत्वादिति। कृतत्रेतयोधर्म सन्देहाभावेनासन्दिग्धतया क्रियमाणानां तेषां भक्तिबोधकातवात्। द्विपरतायां सन्देह इति। द्वपरौ युगसंशयाविति कोशात् द्वापरशब्द उभयार्थः प्रकृते शक्तिनियंत्रणाभावदेकयोक्त्या पुष्पवच्छब्दवदुभयं वक्ति। द्विपरता तूक्ता मात्स्ये द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृता वित्यादिना। एवच्च द्वापरान्ते व्यासावतार आयाति।[11]

लोकेषु अपि च वल्लभसम्प्रदाये दस मर्माणि निगदितानि सन्ति। यथा–

आसरो एक दृढ़ श्रीवल्लभाधीसक्तो
मानसी रीत की मुख्य सेवा व्यसन।।

लौकिकवैदिक त्याग शरण गोपीसक्तो
दीनता–भाव–उद्बोध गुणगानसो
घोष–त्रिय–भावना उभय जाने।।

कृष्णनाम स्फुरे पल न आज्ञा टरे
कृति वचन विश्वास मन चित्त आने।।

भगवदीय जान सतसंग को अनुसरे
न देखें दोष अरु सत्य भाखे।।

पुष्टिपथ मर्म दस धर्म यह विधि कहे
सदा चित्त में ''श्रीद्वारकेश'' राखे।। [12]

लोके कर्मकाण्डस्य महत्वं स्वीक्रियते। यथा –

अनुग्रहेणैव सिद्धिर्लौकिकी यत्र वैदिकी।
न यान्यादन्यथा विघ्नः पुष्टिमार्गः सः कथ्यते।।

ब्रह्मविचार एवारम्भणीयो, न धर्मविचारः। सर्वं वेदव्यासकर्त्रा वेदव्यासेना–कृतत्वात् तुच्छफलत्वाच्च। [13]

तथा हि। जैमिनीधर्मजिज्ञासामेव, प्रतिज्ञाय तत्प्रतिपादकस्य पूर्वकाण्डस्य समन्वयमाह। अवानतरवाक्यानां प्रकारशेषत्वात्। न च सर्वस्मिन् वेदे धर्म एव जिज्ञास्यः। तद् गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्। [14]

इदं च शास्त्रं मोक्षरूपपुरुषार्थ साधकम्। [15]

भगवतः कृष्णस्य आराधनं भागवतकथा द्वारा, यज्ञद्वारा, पुरुषोत्तम सहस्रनामद्वारा च क्रियते। एतानि सर्वाणि पौरोहित्य कर्मद्वारा एव भवति। तत्र गणेश पूजनादि, आरभ्य नवग्रहाणां अर्चनं, कलशस्थापनं, प्रधानपूजनं, अग्निस्थापनं, हवनं, क्षेत्रपालादि बलिदानं च सर्वं कर्मकाण्ड दृष्टया भवति इति।

# सन्दर्भ–सूची


1. मुग्धबोध व्याकरणम्
2. प्रस्थान चतुष्टय
3. गीता – अध्याया–10
4. नारद पंचरात्र
5. भागवत–1/4/14, श्रीमद् वीरराघव व्याख्या
6. भागवत–1/4/14, श्रीमद्विजयध्वज कृत
7. भागवत –1/4/14, श्री जीवगोस्वामी कृत
8. भागवत–1/4/14, श्रीमद् विश्वनाथ चक्रवर्ती कृत
9. श्रीशुकदेव कृत सिद्धान्तप्रदीप, भागवत– 1/4/14
10. सुबोधिनी –1/4/14, प्रस्थान चतुष्टय
11. श्री सुबोधिनी प्रकाश –1/4/14
12. पुष्टिमार्ग– इन्दिरा बेटी जी, पृ.–22–23
13. अणु भाष्य–1/1/1
14. अणु भाष्य–1/1/3
15. अणु भाष्य–1/1/3